सा ।) ज्योतिष्मतीलता । इति राजनिर्घण्टः ॥

अनलप्रिया, स्त्री, (अनलस्य अग्नेः प्रिया षष्ठीतत् ।) अग्निभार्य्या । आग्नेयी । इति जटाधरः ॥

अनलिः, पुं, (अनिति अन् + पचाद्यच् अनः तन्मधुपानेन जीवनधारयिता अलिः भ्रमरो यत्र सः ।) वकवृक्षः । इति त्रिकाण्डशेषः ॥

अनवधानं, क्ली, ( न अवधानं मनोयोगः नञ्समासः ।) चित्तस्याविक्षेपः । अमनोयोगः । अप्रणिधानं । इति हलायुधः ॥ तद्विशिष्टे त्रि ॥

अनवधानता, स्त्री, (नास्ति अवधानं मनोयोगो यस्य सः, तस्य भावः तल्स्तल् स्त्रियां टाप् ।) मनोयोगशून्यता । चित्तस्यानन्यविषयाभावत्वं । कार्य्ये अनवहितत्वं । तत्पर्य्यायः । प्रमादः २ । इत्यमरः ॥

"कर्त्तव्याकरणं यत्र समर्थस्य क्वचिद्भवत् ।
उच्यते द्वितयं तत्र प्रमादोऽनवधानता"॥

इति शब्दरत्नावली ॥

अनवरः, त्रि, (न अवरः, नञ्समासः ।) अकनिष्ठः । अन्यूनः । श्रेष्ठः । प्रधानः । यथा,—

"सोऽयमिन्द्रादनवरो वासुदेवाच्च भारत" ।

इति विराटपर्व्व ॥

अनवरतं, क्ली, (अव + रम् + भावे क्तः, नास्ति अवरतं विरतिर्यत्र तत् ।) निरन्तरं । तत्पर्य्यायः । सततं २ अनारतं ३ अश्रान्तं ४ सन्ततं ५ अविरतं ६ अनिशं ७ नित्यं ८ अजस्रं ९ प्रसक्तं १० आसक्तं ११ अनर्द्धं १२ । इति जटाधरः ॥ तद्विशिष्टे वाच्यलिङ्गं । इत्यमरः ॥ ("अनवरतधनुर्ज्यास्फालनक्रूरकर्म्मा" । इति शाकुन्तले ।)

अनवरार्द्ध्यः, त्रि, (अवरमर्द्ध, कर्म्मधारयः, तत्र भवः, अवरार्द्ध + यत्, ततो नञ्समासः ।) उत्तमः । प्रधानः । इत्यमरः ॥

अनवलम्बः, त्रि, (नास्ति अवलम्बः आश्रयो यस्य सः ।) अवलम्बनशून्यः । निराश्रयः । यथा,—

"न परं पथि पक्षपातिता-
नवलम्बे किमु मादृशेऽपि सा" ।

इति नैषधं ॥

अनवसरः, त्रि, (नास्ति अवसरः अवकाशो यस्य सः ।) निरवकाशः । अवसराभावे पुं । यथा,—

"अतर्कैश्वर्य्ये त्वय्यनवसरदुःस्था हतधियः" ।

इति महिम्नः स्तोत्रं ॥

अनवस्करं, त्रि, (अव अधोवर्त्मना कीर्य्यते क्षिप्यते अव + कृ + अप्, "वर्चस्कोऽवस्कर इति सुड़ागमः" नास्ति अवस्करो मलं यस्य तत् ।) निर्म्मलं । शोधितं । इत्यमरः ॥

अनवस्था, स्त्री, (अव + स्था भावे अङ्, न अवस्था अवस्थानं नञ्समासः ।) तर्कविशेषः । तस्य लक्षणं । अप्रामाणिकानन्तप्रवाहमूलकप्रसक्तत्वं । यथा,—

"घटत्वं यदि यावद्घटहेतुवृत्ति स्यात् घटान्यवृत्ति स्यात्" । इति तार्किकाः ॥ उपपाद्योपपादकयोरविश्रान्तिः । इति मीमांसकाः । दशाभावः । स्थित्यभावः ॥ ("एवमप्यनवस्था स्याद् या मूलक्षतिकारिणी" । इति काव्यप्रकाशे ।)

अनवस्थानः, पुं, (न अवस्थानमवस्थितिर्यस्य सः ।) वायुः । इति राजनिर्घण्टः ॥ अवस्थितिशून्ये त्रि ॥ (चञ्चलः । अव्यवस्थितः ।)

अनवस्थितिः, स्त्री, (न अवस्थितिः अवस्थानं नञ्समासः ।) चापल्यं । चाञ्चल्यं । अस्थिरता । अधैर्य्यं । इति हेमचन्द्रः ॥

अनशनं, क्ली, (अश् भावे ल्युट्, न अशनं भोजनं, नञ्समासः ।) भोजनाभावः । उपवासः । इति हलायुधः ॥ तद्वति त्रि ॥ (प्रायोपवेशनं । "तदहमनशनं कृत्वा प्रातः प्राणानुत्सृजामि" । इति पञ्चतन्त्रे ।)

अनश्वरं, त्रि, (नश् + कर्त्तरि वरच् न नश्वरं, नञ्समासः ।) सनातनं । नित्यं । ध्रुवं । शाश्वतं । इति हेमचन्द्रः ॥ ("मत्वा विश्वमनश्वरं निविशते संसारकारागृहे" । इति वैराग्यशतके ।)

अनसूया, स्त्री, (असु कण्ड्वादित्वात् यक् + भावे अ, स्त्रियां टाप्, न असूया नञ्समासः ।) असूयाभावः । तस्या लक्षणं यथा बृहस्पतिः ।

"न गुणान् गुणिनो हन्ति स्तौति मन्दगुणानपि ।
नान्यदोषेषु रमते सानसूया प्रकीर्त्तिता" ॥

इत्येकादशीतत्त्वं ॥ अत्रिमुनिपत्नी । इति गारुड़े २९ अध्यायः ॥ कर्द्दममुनिकन्या । इति श्रीभागवतं ॥ असूयाशून्ये त्रि ॥

अनहंवादी, [न्] त्रि, (अहमिति गर्व्वं वदति यः, अहं + वद् + णिनि, उपपदसमासः, ततो नञ्समासः । अहमित्यव्ययं ।) गर्व्वरहितः ।

"मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः ।
सिद्ध्यसिद्ध्योर्निर्व्विकारः कर्त्ता सात्त्विक उच्यते" ।

इति श्रीभगवद्गीता । अनहंवादी गर्व्वरहितः । इत्याह्निकतत्त्वं ॥

अनहङ्कृतिः, स्त्री, ( न अहङ्कृतिः अहङ्कारः नञ्समासः ।) अहङ्काराभावः । तत्पर्य्यायः । अशौचः २ । इति त्रिकाण्डशेषः ॥ (त्रि नास्ति अहङ्कृतिः यस्य इति समासे अहङ्कारशून्यः ।)

अनक्षः, त्रि, अक्षिहीनः । अन्धः । न विद्येते अक्षिणी यस्य इत्यर्थे ष प्रत्ययः । अक्षभिन्नः ॥

अनक्षरं, क्ली, (न सन्ति प्रशस्तानि अक्षराणि यत्र तत् ।) दुर्व्वचनं । इति भरतः ॥ अवचनार्हं । इति मधुः ॥ गालिप्रभृति । गुणाक्षेपकदोषाविष्कारिवाक्यं । इति केचित् ॥ तत्पर्य्यायः । अवाच्यं २ । इत्यमरः ॥

अनक्षि, क्ली, ( अप्रशस्तमक्षि नेत्रं, नञ्समासः । ) कुत्सितचक्षुः । तत्पर्य्यायः । असौम्याक्षि २ । इति हेमचन्द्रः ॥

अनाकुलः, त्रि, (न आकुलः नञ्समासः ।) स्थिरः । एकाग्रः । अव्याकुलः । अव्यग्रः । इति जटाधरः । ("अनाकुलाऽविक्लवा च सुसम्भ्रान्ता च मे मतिः" । इति रामायणे ।)

अनाक्रान्ता, स्त्री, (कैरपि न आक्रान्ता आक्रमितुमयोग्या कण्टकव्याप्तत्वात्, नञ्समासः ।) कण्टकारीवृक्षः । इति रत्नमाला ॥ अनाक्रमणविशिष्टे त्रि ॥

अनागतं, त्रि, (आङ् + गम् + कर्त्तरि क्तः, न आगतं नञ्समासः ।) भविष्यत् । इति राजनिर्घण्टः ॥ अनायातं । अनुपस्थितं । अज्ञातं । यथा—

("तावद्भयस्य भेतव्यं यावद्भयमनागतं" ।
इति पञ्चतन्त्रे ।)
"अनागतादिलिङ्गेन न स्यादनुमितिस्तदा" ।
इति भाषापरिच्छेदः ॥

अनागतार्त्तवा, स्त्री, (न आगतमप्राप्तमार्त्तवं स्त्रीपुष्पविकाशनं यस्याः सा, स्त्रियां टाप् । ऋतु + अण् ।) अप्राप्तऋतुका । अरजस्का । तत्पर्य्यायः । गौरी २ नग्निका ३ । इत्यमरः ॥

अनाचारः, पुं, (न कुत्सित आचारः नञ्समासः । नञत्र अप्राशस्त्ये अभावार्थे तु आचाराभावः ।) कदाचारः । अशुद्धाचारः । श्रुतिस्मृतिविरुद्धकर्म्मकरणं । यथा,—

"सर्व्वदेशेष्वनाचारः पथि ताम्बूलचर्व्वणं" ॥

इति स्मृतिः ॥ तद्विशिष्टे त्रि ॥

अनातपः, पुं,(आङ् + तप् + अच्, आतपस्य रौद्रस्याभावः नञ्समासः । ) रौद्राभावः । छाया । इति राजनिर्घण्टः ॥ ( त्रि छायाविशिष्टे ।

"खल्वाटो दिवसेश्वरस्य किरणैः सन्तापिते मस्तके ।
वाञ्छन् देशमनातपं विधिवशात् विल्वस्य मूलं गतः" ॥ इति नीतिशतके । )

अनातुरः, त्रि, ( न आतुरः रोगी नञ्समासः । ) अरोगी । यथा,—

"तेषामनातुराः पूर्व्वं वातलाद्याः सदातुराः" ।

इति चरकः । ("भेजे धर्म्ममनातुरः" । इति रघुवंशे ।)

अनाथः, त्रि, (नास्ति नाथः आश्रयो यस्य सः । ) प्रभुहीनः । नाथशून्यः । यथा,—

"वना वना वनाथवत् स्वजीवना वनाभवत्" ।

इति नलोदयः ।

("नाथवन्तस्त्वया लोकास्त्वमनाथा विपद्यसे" ।
इति उत्तरचरिते ।)

अनादरः, पुं, ( आ + दृ + भावे अप्, न आदरः नञ्समासः । ) निरादरः । तत्पर्य्यायः । परिभवः २ परिभावः ३ तिरस्क्रिया ४ रीढ़ा ५ अवमानना ६ अवज्ञा ७ अवहेलं ८ असूक्षणं ९ । इत्यमरः ॥ अशुक्षणं १० असुक्षणं ११ असूर्क्षणं १२ । इति भरतः ॥ ("गुणेषु रागो व्यसनेष्वनादरः" । इति पञ्चतन्त्रं । )

अनादिः, त्रि, ( नास्ति आदिः कारणं यस्य सः । ) आदिरहितः । उत्पत्तिशून्यः । स्वयम्भूः । यथा,—

"अनादिरादिर्गोविन्दः सर्व्वकारणकारणं" ।

इति ब्रह्मसंहिता ॥

अनादृतः, त्रि, ( आ + दृ + कर्म्मणि क्तः, न आदृतः नञ्समासः । ) निरादरः । अवज्ञातः । अवमानितः । इति हेमचन्द्रः ॥